दरम् ॥*॥ प्लीहोदरमाह ।
"वर्द्धते प्लीहवृद्ध्या यद्विद्यात् प्लीहोदरं हि तत् ।
तद्वामे वर्द्धते पार्श्वे निमित्तं तस्य तच्च यत् ॥
प्रवृद्धप्लीहलिङ्गानि यान्युक्तानि भिषग्वरैः ।
प्लीहोदरेऽपि दृश्यन्ते तानि सर्व्वाणि देहिनाम्" ॥
प्लीहोदरस्यैव भेदो यकृद्दाल्युदरं न पुनरधिक-
मित्याह । "सव्यान्यपार्श्वे यकृति प्रवृद्धे ज्ञेयं यकृ-
द्दाल्युदरं तदेव" । यकृद्दालयति दोषैर्भेदयतीति
यकृद्दाल्युदरं तदेव उदरमेव ॥*॥ बद्धगुदमाह ।

"यस्यान्नमन्नैरुपलेपिभिर्व्वा,
बालाश्मभिर्व्वा पिहितं यथावत् ।
सञ्चीयते यस्य मलः सदोषः,
शनैः शनैः शङ्करवच्च नाड्याम् ॥
निरुध्यते यस्य गुदे पुरीषं
निरेति कृच्छ्रादपि चाल्पमल्पम् ।
हृन्नाभिमध्ये परिवृद्धिमेति
तस्योदरं बद्धगुदं वदन्ति" ॥

उपलेपिभिः पिच्छिलैरन्नैः शाकशालुकादिभिः ।
बालाश्मभिः बालुकाभिः कर्क्करैर्व्वा बालैः केशैः
अश्मभिः पाषाणैर्व्वा । यथावत् यस्य यत् सम्भवति ।
मलः पुरीषम् । शङ्करवत् संमार्ज्जनीक्षिप्तधूला-
धूल्यादिवत् । "शङ्करोऽवकरः पुमान्" इत्यमरः ।
शङ्करो घूग इति लोके । नाड्यां अन्त्रनाड्याम् ।
हृन्नाभिमध्ये हृन्नाभ्योर्मध्ये ॥*॥ क्षतोदरमाह ।

"शल्यं यथान्नोपहृतं यदन्त्रं
भुक्तं भिनत्त्यागतमन्यथा वा ।
तस्मात् क्षतोऽन्त्रात् सलिलप्रकाशः
स्रावः स्रवेद्वै गुदतस्तु भूयः ॥
नाभेरधश्चोदरमेति वृद्धिं
निस्तुद्यते दाल्यति चातिमात्रम् ।
एतत् परिस्राव्युदरं प्रदिष्टं
दकोदरं कीर्त्तयतो निबोध" ॥

शल्यं कर्क्करादि । अन्नोपहृतं अन्ननिहितम् । भुक्तं
यदन्त्रं भिनत्ति । तथा अन्यथा आगतं भोजनं
विना आगतं शरादि । तदपि यदन्त्रं भिनत्ति
एतदुपलक्षणम् । जृम्भणमत्यशनं वा यदन्त्रं
भिनत्ति । यत उक्तं चरके ।
"शर्क्कराटणकाष्ठास्थिकण्टकैरन्नसंयुतः ।
भिद्येतान्त्रं यदा भुक्तं जृम्भयात्यशनेन वा" ॥ इति ।
तस्मात् भिन्नादन्त्रात् । गुदतस्तु भूयः अन्त्रात्
संस्रुत्य पुनर्गुदतः स्रवेदित्यर्थः । दाल्यति विदी-
र्य्यतइव । पदसिद्धिरार्षत्वात् । एतत् क्षतोदरं
तन्त्रान्तरे परिस्राव्युदरं प्रदिष्टम् ॥*॥
उदकोदरमाह ।

"यत् स्नेहपीतोऽप्यनुवासितो वा,
वान्तो विरिक्तोऽप्यथवा निरूढः ।
पिबेज्जलं शीतलमाशु तस्य
स्रोतांसि दुष्यन्ति हि तद्वहानि ॥
स्नेहोपलिप्तेष्वथवापि तेषू-
दकोदरं पूर्ब्ववदभ्युपैति ।
स्निग्धं महत्तत् परिवृत्तनाभि
समाततं पूर्णमिवाम्बुना च ।
यथा दृतिः क्षुभ्यति कम्पते च
शब्दायते चापि दकोदरं तत्" ॥

स्नेहपीतः पीतइत्यत्राध्यवसितादित्वात् कर्त्तरि
क्तः पश्चात् स्नेहं पीतः स्नेहपीत इति तत्पुरुषः ।
तेन स्नेहं पीतवानित्यर्थः । अनुवासितो वा गृहीतानुवासनवस्तिः ।
वान्तः अत्रापि पूर्ब्बवत् कर्त्तरि
क्तः तेन वान्तवानित्यर्थः । एवं विरिक्तः विरिक्त-
वान् । तथा निरूढः गृहीतनिरूढवस्तिः । स
चेदाशु शीतलं जलं पिबेत् । तस्य तद्वहानि जल-
वहानि स्रोतांसि दुष्यन्ति स्वकर्म्मदुष्टानि भवन्ति
जलवहेषु स्रोतःसु दुष्टेषु सत्सु अन्नरसे उपस्ने-
हन्यायेन वहिर्भूते दकोदरमायाति । अथवा
तेषु उदकवहेषु स्रोतःसु स्नेहोपलिप्तेषु पूर्ब्बवत्
यथापूर्ब्बम् । अन्नरसे उपस्नेहन्यायेन वहिर्निःसृते
दकोदरमायाति । तथा जलेऽपि वहिर्निःसृते
दकोदरमायाति । तत् उदरम् । परिवृत्तनाभि
गम्भीरनाभि । समाततं स्तब्धम् । यथा दृतिः
चर्म्ममयं जलाहरणपात्रम् । क्षुभ्यति अन्तर्जला-
दोलनेन सञ्चलति कम्पते वहिः शब्दायते कम्प-
मानं सत् शब्दं करोति ॥*॥

साध्यासाध्यलक्षणमाह ।
"जन्मनैवोदरं सर्व्वं प्रायः कृच्छ्रतमं मतम् ।
बलिनस्तदजाताम्बु यत्नसाध्यं नवोत्थितम्" ॥
बलिनः अजाताम्बु नवोत्थितञ्च यत्नसाध्यमित्यन्वयः ।
"पक्षाद्बद्धगुदं तूर्द्ध्वं सर्व्वं जातोदकं तथा ।
प्रायो भवत्यभावाय छिद्रान्त्रञ्च दकोदरम्" ॥
छिद्रान्त्रं शरादिना छिद्रमन्त्रं यस्य तदुदरं अभा-
वाय भवति ॥*॥
जातोदकस्योदरस्य लक्षणमाह । चरकः ।
"पयःपूर्णा दृतिरिव क्षोभे शब्दकरं मृदु ।
अप्रव्यक्तशिरःसूत्रं नितान्तमुदरं महत् ॥
आलस्यमास्यवैरस्यं सूत्रं बद्ध सकृच्छ्रतः ।
जातोदकस्य लिङ्गं स्यान्मन्दोऽग्निः पाण्डुतापि च ॥
शूलाढ्यं कुटिलोपस्थमुपक्लिन्नतनुत्वचम् ।
बलशोणितमांसाग्निपरिक्षीणञ्च वर्ज्जयेत्" ॥
शूलाढ्यस्थाने शूनाढ्यमिति च पाठः । कुटिलोपस्थं
वक्रमेहनम् । उपक्लिन्नतनुत्वचं । उपरि आर्द्रा तन्वी
त्वग्यस्य । तं उदरिणम् ।
"पार्श्वभङ्गान्नविद्वेषशोथातीसारपीड़ितम् ।
विरिक्तं चाप्युदरिणं पूर्य्यमाणं विवर्ज्जयेत्" ॥
विरिक्तमपि पूर्य्यमाणं पूर्य्यमाणोदरं उदरिणं
विवर्ज्जयेत् ॥*॥

अथोदरस्य चिकित्सा ।
"एरण्डतैलं दशमूलमिश्रं
गोमूत्रयुक्तस्त्रिफलारसो वा ।
निहन्ति वातोदरशोथशूलान्
क्राथः समूत्रो दशमूलजश्च ॥
कुष्ठं दन्ती यवक्षारः पाठा त्रिलवणं वचा ।
शुण्ठी चोष्णाम्बुना पीता वातोदररुजापहा" ॥
कुष्ठादिचूर्णम् ॥*॥
"लशुनस्य तुलामेकां जलद्रोणे विपाचयेत् ।
त्रिकटु त्रिफला दन्ती हिङ्गु सैन्धवचित्रकम् ॥
देवदारु वचा कुष्ठं मधु शिग्रुः पुनर्नवा ।
सौवर्च्चलं विड़ङ्गानि दीप्यको गजपिप्पली ॥
एतेषां पलिकान् भागान् त्रिवृतः षट्पलानि च ।
पिष्ट्वा कषायेणैतेन तैलं मृदग्निना पचेत् ॥
तत्पिबेत् प्रातरुत्थाय यथाग्निबलमात्रया ।
निहन्ति सकलान् रोगान् उदराणि विशेषतः ॥
मूत्रकृच्छ्रमुदावर्त्तमन्त्रवृद्धिगुदक्रमीन् ।
पार्श्वकुक्षिभवं शूलमामशूलमरोचकम् ॥
यकृदष्ठीलिकानाहान् प्लीहानं चाङ्गवेदनाम् ।
मासमात्रेण नश्यन्ति अशीतिर्वातजा गदाः" ॥
इति रसोनतैलम् ॥*॥
"पित्तोदरेषु बलिनं पूर्ब्बमेव विरेचयेत् ।
दुर्ब्बलं त्वनुवास्यादौ शोधयेत् सौरवस्तिना ।
संजातबलकायाग्निं पुनः स्निग्धं विरेचयेत् ॥
पयसा च त्रिवृत्कल्कैरुरुवूकस्य घृतेन च ॥
पिप्पल्यादिगणेनाज्यं पाचितं पाययेद्भिषक् ।
नरं पथ्यभुजं नित्यं कफोदरनिवृत्तये" ॥*॥
"नागरत्रिफलाकल्कैर्दध्यम्बुपरिपेषितैः ।
पाचितं तैलमाज्यञ्च पिबेत् सर्व्वोदरापहम्" ॥
इति नागरादितैलं घृतञ्च ॥*॥
"शालियष्टिकगोधूमयवनीवारभोजनम् ।
निरूहो रेचनं श्रेष्ठं सर्व्वेषु जठरेषु च ॥
आनूपमोदनं मांसं शाकं पिष्टकृतं तिलाः ।
व्यायामञ्च दिवास्वप्नयानपानानि वर्ज्जयेत् ॥
तथोष्णलवणोष्णानि विदाहीनि गुरूणि च ।
नाद्यादन्नानि जठरे तोयपानञ्च वर्ज्जयेत् ॥
उदराणां मलाढ्यत्वाद्बहुशः शोधनं हितम् ।
क्षीरेणैरण्डतैलं वा पिबेन्मूत्रेण वासकृत्" ॥*॥
"वातोदरी पिबेत्तक्रं पिप्पलीलवणान्वितम् ।
शर्क्करामरिचोपेतं स्वादु पित्तोदरी पिबेत् ॥
यवानीहपुषाजाजीव्योषयुक्तं कफोदरी ।
सन्निपातोदरी युक्तं त्रिकटुक्षारसैन्धवैः ॥
यवानी हपुषा धान्यं त्रिफला चोपकुञ्चिका ।
कारवी पिप्पलीमूलमजगन्धा शटी वचा ॥
शताह्वा जीरको व्योषं स्वर्णक्षीरी च चित्रकम् ।
द्वौ क्षारौ पौष्करं मूलं कुष्ठं लवणपञ्चकम् ॥
विड़ङ्गञ्च समांशानि दन्त्या भागत्रयं भवेत् ।
त्रिवृद्विशाले द्विगुणे सातला स्याच्चतुर्गुणा ॥
एष नारायणो नाम्ना चूर्णो रोगगणापहः ।
एनं प्राप्य निवर्त्तन्ते रोगा विष्णुमिवासुराः ॥
तक्रेणोदरिभिः पेयो गुल्मिभिर्वदराम्बुना ।
आनद्धवाते सुरया वातरोगे प्रसन्नया ॥
दधिमण्डेन विड़्बन्धे दाड़िमाम्बुभिरर्शसे ।
परिकर्त्तेषु वृक्षाम्लैरुष्णाम्बुभिरजीर्णके ॥
भगन्दरे पाण्डुरोगे कासे श्वासे गलग्रहे ।
हृद्रोगे ग्रहणीरोगे कुष्ठे मन्देऽनले ज्वरे ॥
दंष्ट्राविषे मूलविषे सगरे कृत्रिमे विषे ।
यथार्हं स्निग्धकोष्ठेन पेयमेतद्विरेचनम्" ॥
उपकुञ्चिका कारवी च वृहज्जीरकः । यस्य मग-
रैला नाम इति लोके । तस्य भागद्वयं ग्राह्यं पुन-
रुक्तेः । स्वर्णक्षीरी चोक इति लोके । विशाला
इन्द्रवारुणी । सातला सीऊण्डभेदः सातलेत्येव